वर्षम् - ०२ अङ्कः - ०२ शोधज्योतिः
जनवरी-दिसम्बर, २०२० ISSN-2350-0700

# साम्प्रतं मानवस्य विसङ्गत्यां संस्कृतस्य योगदानम्

**डॉ. महेन्द्रकुमार अं. दवे[1]**

भारतमेको विशालदेशो वर्तते, यस्य नागरिकेषु जाति - वर्ण गता भेदा एव न, अपितु वेश-भाषा-आहार-व्यवहारविषयका: स्थानीया विविधता अपि दरीदृश्यन्ते। वर्तमाने मानवजीवने स्थिरताया: अभावो जायते अत: सम्प्रति जीवनयापन - प्रणाली जटिला जायते। सारल्येन जीवनं यापयितुम् इच्छन्ऽपि जन: नानाविधाभि: समस्याभि: बलादेव संश्लिष्टो भवति। सम्प्रति सभ्यता वैषयिक - विद्याप्रस्तुतेन शिल्पोद्योगेन सकामै: कार्यकलापैश्चासौ वस्तुवादाभिमुखी भवति। फलेन जनानां मनोवृत्ति: साधारणतया भौतिकविद्या प्रभाविता सती नैतिकजीवन प्रति पराङ्गमुखा जायते। सहजलभ्यं मानसिकी स्वच्छता मनोऽनुकूला सन्तुष्टि: सारल्यञ्च ह्रसतेतराम्। सुलभां वैदेशिकी सभ्यताम् आहृत्य पारम्परिकीं सनातनीं संस्कृतिं चोपेक्षन्ते ते। पारिवारिके सामाजिके च क्षेत्रे प्राय: च्छलनामयं व्यवहारं प्रदर्शयन्तस्त निरभिमानं स्नेहसौहार्दम्, आत्मियतां च विस्मरन्तीं यान्ति। आहारे विहारे व्यवहारे च कृत्रिमता परिलक्ष्यते तथैव दिने दिने मनुष्यस्य पारिवारिकं सामाजिकं सांस्कृतिकं च जीवनं सदा सहर्षमयं तथा दुर्विषहं भवति।

अत: सम्प्रति दैनान्दिने जीवने प्रतिपदं सकलै: जनै: जीवनयापनकलाया: प्रशस्तं ज्ञानं सर्वथाऽपेक्षते। तस्य कृते चतुर्षु वेदेषु एवं वैदिकेषु दर्शनेषु उल्लेखितेषु सांख्य, योग, न्याय, वैशेषिक, मीमांसा, वेदान्तादिषु षड्दर्शनेषु तथा च गीतोपनिषदादिषु शास्त्रग्रन्थेषु अभास: अपेक्ष्यते। आधुनिककाले योगं मानवजीवनस्य स्वास्थ्यार्थम् अतीव उपयोगी अस्ति। योगस्य विद्या अनेकाऽस्ति ।गीतोपनिषदादिनां शास्त्राणां प्रमाणानुसारं राजयोग:, ज्ञानयोग:, क्रियायोग:, भक्तियोग:, हठयोग: एवं ध्यानयोग: बहुविधा योगा: व्यपदिश्यन्ते। एते समे योगा: जनकल्याणं निमित्तं भृशं उपयोगिनो भवन्ति। तथाऽपि अधुना पतंजलिमुनिना प्रदर्शितस्य अष्टाङ्गयोगस्य व्यावहारिक: उपयोग: साधकानां कृतेऽवश्यं फलप्रदो भवति। नियमानुसारं योगाभ्यासस्य फलेन मानवो नूनम् आप्तकामो भवति। किञ्च स्वकीयं पौरुषार्जितं साफल्यं कस्मै वा न रोचते? निरामयं शरीरं, निरूपद्रवं नियन्त्रितं च मन: प्रज्ञानुमोदित: विचारं तथा अन्त:करणे चिरशान्तिं को वा न कामयते? अत: अस्यामेव जीवनदशायां सुचिरं नि:श्रेयसं सदा सुखसौभाग्यं चाकांक्षतां जनानां कृतेऽयम् अष्टांगयोग: सर्वथा शिक्षणीय:

[1] प्रोफेसर, साहित्यविभाग:, श्रीसोमनाथसंस्कृतयुनिवर्सिटी वेरावलम्

पालनीयश्च भवेत्। साफल्यं अर्वाचीनकाले छात्राणां सर्वांगीणविकासं साधयितुं संस्कृतस्य शिक्षणमेव मन्मते आवश्यकं वर्तते। संस्कृतज्ञानस्य साहित्यिकं तथा च दार्शनिकं महत्वं निरुपमं विद्यते। प्राचीनतमवैदिकवाङ्मयस्य अध्ययनेन तत्कालीनाया: कुटुम्बव्यवस्थाया: एवं स्वधर्माचरणस्य समुचितम् आकलनं भवति। वेदो नाम ज्ञानराशि:। लौकिका: अलौकिका: च अनंतविचारा: वेदमन्त्रेषु निहिता: सन्ति। वेदे बहव: मन्त्रा: शिक्षाया: विविधमुखं विवृण्वन्ति। ऋग्वेदस्य सप्तममण्डले शिक्षा अज्ञानान्धकारं दूरीकृत्य ज्ञानदीपं प्रज्वालयति।[१] सत्सङ्गति: उद्यमशीलतावद् अन्यता एकतादय: मानवमूल्यात्मका: गुणा: ऋग्वेदादिसंहितासु दृढा: अवधारिता:। शिक्षा मानवस्य व्यक्तित्वं पोषयति। अनया अन्तरं बाह्यं च सौन्दर्यं वर्धते। कुरूपिणं सुरूपिणं कारयति। हे मानवा: भवन्त: शिक्षया कुरूपम् अपहाय सुरुपं प्राप्नुवन्तु इति उपदेश: अन्तर्निहित:। उदाहरणार्थं मानवकल्याणाय ऋषि: उद्घोषयति।[२] तथा च " न दुरुत्काय स्पृहयेत्।[३] एवं केवलाधो भवति केवलादी।[४] तथा च संगच्छध्वं सं वदध्वं सं वो मनांसि जानताम्।[५] उपनिषदि अपि सह नाववतु सह नौ भुनक्तु - इति मन्त्रे सहजीवनस्य सम्यक् प्रार्थनाऽस्ति। मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे।[६] एवं " कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा:।[७] आदिषु मन्त्रेषु जीवनसमृद्धर्थम् आत्मा विकासकृते च आर्षा: आदेशा: उपलभ्यन्ते। मानवाधिकाराणां रक्षणं, समष्टिभावना वेदकालीनस्य आदर्श: भवति। एषा भावना सामाजिकसमानताया: प्राणभूता वर्तते। परवर्तिकाले स्मृतिषु यानि यानि कर्तव्यानि उल्लिखितानि भवन्ति। तानि मनुष्यस्य वेदप्रेरितानि अधिकाराणि एव भवन्ति। तैत्तिरियोपनिषदि शिक्षावल्यां कथितमस्ति - सत्यं वद, धर्मं चर, स्वाध्यायात् मा प्रमद:। मातृदेवो भव:, पितृदेवो भव:, आचार्यदेवो भव:, अतिथिदेवो भव: एतेषु शब्देषु मानवताया: अधिकारघोषणापत्रं समाविष्टं भवति। वेद: जीवनस्य संविधानम् अस्ति। सम्प्रति विश्वस्य समक्षं मानवाधिकारस्य समस्या अत्यंतं जटिलरूपेण विद्यमानाऽस्ति। "सर्वे भवन्तु सुखिन: सर्वे सन्तु निरामया "एतस्मिन् शान्तिमन्त्रे सर्वजनकल्याणाय प्रार्थनाऽस्ति। सर्वे जना सुखशान्ति समृद्धिमाप्नुवन्ति इति अस्माभि: काम्यते। मानवेन न केवलं स्वस्य

---

[१] आपो संहि व्ययति तमो ज्योतिष्कृणोति।- ऋग्वेद: - ७-८१-१

[२] न ऋते श्रान्तस्य सखाय देवा:।- ऋग्वेद:- ४/३३/११

[३] ऋग्वेदः - १-४-१९

[४] ऋग्वेद: - ९०-११७-६

[५] ऋग्वेद: - १०/१/१९

[६] यजु:- ३६/१८

[७] यजु:- ४०/२

कृते अपितु समाजस्य कृते अन्येषां कल्याणं विचार्यं बहुविध कार्यं कर्तव्यम् एतत् संबोधनं प्राप्यते श्रीमद्भगवद्गीतायाम्।

अस्यामेव संस्कृतभाषायां आदर्शभूतानि देवचरितानि द्योतन्ते, उपनिषदानि एवं सकलशास्त्रेषु निकषायमाना भगवद्गीता अधुनाऽपि चास्यामेव गीयते यच्चास्माकं प्रति सुष्ठु न प्रतीयते तदन्यान् प्रत्यपि न भावयेत् इत्याशय इति विचार: अस्माभि: स्वकीयम् आचरणं आनेतव्यं। तेन च संसारजाले पतनं न भवति। दुष्कर्मण: अस्मान् संरक्षेत् तत् चास्माकं आभ्यान्तरविकासचिन्तनयो: परिवर्तनं भविष्यतीति। विश्वेऽस्मिन् विभिन्नेषु कार्यक्षेत्रेषु येऽपि वैज्ञानिका: सामाजिका: मनोवैज्ञानिका: औद्योगिकाश्च अभवन्, ते सर्वे निष्काम कर्मसंलग्ना: आसन्। अस्माकं जीनवसाफल्यस्य पथदर्शक: ग्रन्थ: श्रीमद्भगवद्गीतायां सात्विक - राजस -तामसगुणभेदेन वर्णितमस्ति। यजुर्वेदे तु "कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा:" कथ्यते। तदेव तस्य "ईप्सिततमं कर्म" जीवनस्य समग्रसिद्धिं प्रापयति। संस्कृतसाहित्ये न एकं तथ्यमपितु अनेकानि तथ्यानि समाहितानि सन्ति यथा - अध्यात्मसंस्कृति:, राजनीतिविज्ञानं, शिक्षणं, चिकित्सा, वास्तुशास्त्रं, ज्योतिषं पर्यावरणञ्चेत्यादि। राजनीतिक्षेत्रे आचार्यचाणकस्य नाम को न जानाति? एवमेव ज्योतिषक्षेत्रे आर्यभट्टोभास्कराचार्यश्चेत्यादि सर्वमान्या: सन्ति। प्रसिद्धसमाजशास्त्रिण: रूपे महाराजमनु: विख्यातोऽस्ति। अर्थशास्त्रीयक्षेत्रे आचार्यकौटिल्यस्य प्रशंसां के न कुर्वन्ति? चिकित्साशास्त्रस्य क्षेत्रे धन्वन्तरी प्रसिद्ध: आचार्य:। शल्य चिकित्सामर्मज्ञो चरक: अद्य सर्वै: पठ्यते। गीतोपनिषदादिनां धर्मग्रन्थानां पूर्णरूपेणा आत्मसात् कृत्वा अस्माकं भारतीया: विचारका: दार्शनिका: योगी अरविन्द: टैगोर:, विवेकानन्द:, महात्मागान्धीत्यादय: स्वोदानविचारै: निष्कामकर्मभावनया च महान्त: बभूवु:। तेषां कार्यसिद्धान्ता: समग्रविश्वस्य मार्गदर्शनं कुर्वन्त: सन्ति। अस्या : समस्याया: समाधानार्थं तथा भारतीयवाङ्मयाध्ययनस्य महती आवश्यकता वर्तते।

भारतीयमानसस्य, भारतीयचिन्तनस्य च मूलभूताभेदस्य संरक्षणे विद्यमानमैक्यविधायितत्त्वं महत्वपूर्णं वर्तते। संस्कृतं भारतीयसंस्कृते: शरीररूपेण चिरन्तनकालादेव प्राणभूताऽस्ति। विभिन्नसंप्रदायै: भारतीयसंस्कृतिरिव संस्कृतभाषाऽपि चिरादेव समानरूपेण समाश्रिता परिपुष्टा च वर्तते। अद्यत्वेऽपि विभिन्नभाषाभाषिप्रान्तेषु भारतस्य विभिन्नधार्मिकसंप्रदायेषु च संस्कृतभाषैव सांस्कृत्यैकसूत्रतां सम्पाद्यते।

भास:, अश्वघोष:, कालिदास:, भवभूति:, शूद्रक: प्रभृतिभि: कविवर्यै: विरचितं प्रभूतं संस्कृतसाहित्यं न केवलं काव्यदृष्ट्या मनोज्ञानम् अपि तु भारतीय संस्कृते: समिचितं निर्दिष्टम्। लौकिकव्यवहारस्य मार्गदर्शकं तत्त्वमपि तस्मिन्नेव साहित्ये सुष्ठु संदिष्टमस्ति। अत: कथयति -

**अपारे काव्यसंसारे कविरेक: प्रजापति: ।**
**यथास्मै रोचते विश्वं तथेदं परिवर्तते ॥[१]**

भवभूतिनोत्तररामचरिते स्वकीये नाटके वैज्ञानिकजीवनस्य समुत्तमं लक्ष्यं चारुतया आलेखितमस्ति।[२] असौ संस्कृतमन्दाकिन्या: सर्वतोभद्र: प्रवाह: अविच्छिन्न: निरंतरं वर्धत एव। अर्वाचीनसमये अपि काव्यं,नाटकं, कथा, कादम्बरीसदृशं प्रभूतं साहित्यं विनिर्मितं वर्तते। संस्कृतसाहित्ये रामायणं - महाभारतं - रघुवंशं - कुमारसंभवं - मेघदूतं - किरातार्जुनीयं - शिशुपालवधं - नैषधियचरितं - इत्यादीनि सुप्रसिद्धानि काव्यानि सन्ति। काव्येषु धर्मार्थकाममोक्षाणां समुपलब्धि: भवति। काव्यात् कीर्ति:, धनं, व्यवहारज्ञानम्, अमङ्गलनिवारणं, परमानन्दानुभूति: इत्येते भवन्ति।[३] यथा च कोऽपि काव्यं कर्तुं समीहते तस्य कृते भरतमुनि - दण्डी - मम्मट - वामनादया: प्रज्वालिता: प्रदीपा: इव मार्गदर्शका: वर्तन्ते। एवं च परां मन: शान्त्यर्थे परमपदस्य प्राप्त्यर्थं शाण्डिल्यभक्तिसूत्र - नादभक्तिसूत्रादय: प्रभूतय: ग्रन्था: प्राप्यन्ते। तथा च व्याकरणविज्ञान - छंदशास्त्र - योगशास्त्र - ज्योतिषशास्त्र - वास्तुविधान: - कृषिशास्त्र - व्युत्पत्तिविज्ञानादय: विपुलाविद्याप्रवाहा एवं मनोविज्ञानस्य आत्मविद्याया: ज्ञानार्थेऽपि बहव: तत्त्वग्रन्था: एवं शीलवर्धनम्, उद्यमशीलता, स्वधर्मपालनम् इत्यादिना विषये सर्वश्रेष्ठज्ञानम् अपि संस्कृते सम्मितमस्ति।[४]

किं बहूना! सा सर्वाषां भाषाणाञ्जननी, संस्कृते: मानवस्य आत्मोन्नतिसाधकं, ज्ञानवर्धकं, परमेशप्रापकं, समष्टिविकासकारकं, राष्ट्रभावनोत्तेजकं, ज्ञानंसम्मिलिमस्ति। संस्कृतसरस्वती सर्वेषां भाषाणां प्राणभूता एवम् अस्माकं संस्कृत्या: आधारभूता चास्ति। संस्कृतसाहित्यं मानवस्य बाह्योन्नति एवमात्मोन्नति करोति। अन्तरं एवं बाह्य सौन्दर्यं वर्धयन्ति। आत्मोन्नत्या सह इहलोकस्य एवं परलोकस्य उद्धारमपि करोति।

---

१ अग्निपुराणम्-३३९/१०

२ अद्वैतं सुखदु:खयोरनुगतं सर्वास्ववस्थासु यद् विश्रामो ह्यस्य यत्र जरसा यस्मिन्न हार्य रस:।
कालेनावरणात्ययात्परिगणेयस्नेहसारे स्थितभद्रं तस्य सुमानुष्यस्यकथमप्येकं हि तत्प्राप्यते॥
उत्तररामचरितम्- १-३९

३ काव्यं यशसे अर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यपरनिर्वृत्तये कान्तासम्मिततयोपदेशयुजे॥ - काव्यप्रकाश:- १-४

४ आत्मना विन्दते वीर्यं.....तेजस्वि नावधीतमस्तु ।-- तैत्तरियोपनिषद्-३/१०